| | | |
|---|---|---|
| Shaking, trembling 4. | [1]प्रेङ्खोलितं [2]तरलितं [3]प्रेङ्खितं [4]लुलितं स्मृतम् । | |
| Proper, fit 5. | [1]युक्तं [2]स्यादुचितं [3]न्याय्यं [4]प्राप्त[5]मौपयिकं तथा ॥७४६॥ | |
| Placed in or upon 4. | [1]आहितं [2]निहितं [3]न्यस्त[4]मारोपितमिति स्मृतम् । | |
| Put on, dressed 4. | [1]बद्धं [2]पिनद्ध[3]मामुक्त[4]मपिनद्धं च कथ्यते ॥७४७॥ | |
| Cheating 4. | [1]वञ्चनं [2]चातिसन्धानं [3]व्यलीकं स्यात्प्रतारणम् । | |
| Infraction of an engagement, deception 3. | [1]विप्रलम्भो [2]विसंवादो [3]विप्रलापश्च [a]कीर्तितः ॥७४८॥ | |
| Offence, fault 5. | [1]व्यलीक[2]मपराधः [3]स्यादागो [4]मन्तुश्च [5]विप्रियम् । | |
| Courtesy 4. | [1]प्रणतिः [2]स्यादनुनयः [3]प्रणिपातश्च [4]सान्त्वनम् ॥७४९॥ | |
| Introduction; resolution; beginning 2. | [1]उद्घात उक्तः [2]प्रस्तावो [1]वारश्चा[2]वसरः [3]क्षणः । | Opportunity 3. |
| Approached, near 3. | वदन्त्यु[1]पनतं प्राज्ञा [2]उपसन्न[3]मुपस्थितम् ॥७५०॥ | |
| High, tall 5. | [1]प्रांशू[2]च्च[3]मुन्नतं [4]तुङ्ग[b]मु[5]दग्रं [1]दीर्घ[2]मायतम् । | Long 2. |
| Unfettered, unrestrained 4. | [1]अयन्त्रितं [2]स्यादुद्दाम[3]मुच्छृङ्खल[4]मनर्गलम् ॥७५१॥ | |
| Clear, manifest 5. | [1]विशदं [2]प्रकटं [3]स्पष्टं [4]प्रकाशं [5]स्फुटमिष्यते । | |
| Forth with 2. | [1]तत्क्षणै[2]कपदे तुल्ये [1]सद्यः [2]सपदि च [c]स्मृते ॥७५२॥ | On the spot 2. |
| Large, broad 4. | [d][1]विशङ्कटं [2]विशालं [3]स्यात्करालं [4]विकटं तथा । | |
| Globular, round 3. | [1]निस्तलं [2]वर्तुलं [3]वृत्तं [1][e]स्थपुटं [2]विषमोन्नतम् ॥७५३॥ | Unevenly raised 2. |
| A bucket 2. | [f][1]अवगाहो [2]जलद्रोणी [1]निर्वेदः [2]खेद उच्यते । | Grief 2. |
| Carelessness 2 | [1]प्रमादोऽ[2]नवधानं [g]स्याद[1]त्याधान[2]मतिक्रमः ॥७५४॥ | Transgression 2. |
| Enjoyment 2. | [1]निर्वेश [2]उपभोगः [1]स्यादाभोगः [2]परिपूर्णता । | Fulness, completeness 2. |
| Well known, censured. | [1]अवगीतं [h][2]मुहुर्दृष्टमुपलब्धं च यद्भवेत् ॥७५५॥ | |

a कीर्त्यंते, कीत्यन्ते b तुगं उदंतं c स्मृतम् d विसंकटं e छपुटं, सपुटं f अवगादो g स्यादन्याधान, स्यादत्यादान h मुहुर्दिष्ट, मुहुर्दुष्ट ।